# devIshatakam

# દેવીશતકમ્

## Document Information

Text title : devIshatakam

File name : devIshatakam.itx

Category : shataka, devii, devI

Location : doc_devii

Author : AnandavardhanAchArya

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Latest update : December 27, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# દેવીશતકમ્

શ્રીગણેશાય નમઃ ।
અનન્તમહિમવ્યાપ્તવિશ્વાં વેધા ન વેદ યામ્ ।
યા ચ માતેવ ભજતે પ્રણતે માનવે દયામ્ ॥ ૧॥

નતાપનીતક્લેશાયાઃ સુરારિજનતાપની ।
ન તાપની તનુર્યસ્યાસ્તુલ્યા નાદીનતાપની ॥ ૨॥

વક્ત્રપદ્મા વિધેર્ભાન્તિ યયા સર્ગલયો દયા ।
યા સાક્ષાદ્યા ચ જનિતસ્થિતિસર્ગલયોદયા ॥ ૩॥

યાશ્રિતા પાવનતયા યાતનાચ્છિદનીચયા ।
યાચનીયા ધિયા માયાયામાયાસં સ્તુતા શ્રિયા ॥ ૪॥

નમાંસિ ધ્વંસમાયાન્તિ અસ્યાઃ સ્તુત્યાદરેણ વઃ ।
તસ્યાઃ સિદ્ધ્યૈ ધિયાં માતુઃ કલ્પન્તાં પાદરેણવઃ ॥ ૫॥

ઋષીણાં સાદયામાસ યા તમાંસિ ત્રયીમયી ।
પાયાદ્વઃ સા દયામાધિચ્છિદં જગતિ બિભ્રતી ॥ ૬॥

સ્મરદ્વિષા યા યયાચે યયા ચેયં વિધેઃ ક્રિયા ।
યાં ચાચ્યુતોઽપિ તુષ્ટાવ તુષ્ટા વઃ સાઽસ્તુ પાર્વતી ॥ ૭॥

યા દમાવનયાગેન સ્વારાથા નયસારયા ।
હરિકૈતવહાસ્યાય સાયામા વિજિતા યયા ॥ ૮॥

યાયતાજિવિમયા સા યસ્યા હા બત કૈરિહ ।
યા રસાયનધારા સ્વા ન ગેયાનવમા દયા ॥ ૯॥

સા બુદ્ધિરુત્તમાલોકઃ સતામાર્યા પુનાતુ વઃ ।
યદ્ભક્તેરુત્તમા લોકઃ પ્રાપ્નોત્યેષ વિશુદ્ધતામ્ ॥ ૧૦॥

અયુદ્ધ સાધુત્રાણાય સામરા યા સહારિણા ।

ખડ્ગેન દીપ્રા દેવાનાં સામરાયાસહારિણા ॥ ૧૧॥

ચરણાઘાતનિહતકાસરા ચ રણાજિરે ।
રરાજ યા નયજયૈરરાજસજનાનતા ॥ ૧૨॥

સાવતાદ્વોઽમ્બિકાઽભ્યર્ચ્યનામા ન ન યશોભિતઃ ।
તનોતિ પ્રણતો યસ્યા ના માનનયશોભિતઃ ॥ ૧૩॥

સંયતં યાચમાનેન યસ્યાઃ પ્રાપિ દ્વિષા વધઃ ।
સંયતં યા ચ માનેન યુનક્તિ પ્રણતં જનમ્ ॥ ૧૪॥

યા દમાનવમાનન્દપદમાનનમાનદા ।
દાનમાનક્ષમાનિત્યધનમાનવમાનિતા ॥ ૧૫॥

સા રક્ષતાદપારા તે રસકૃદ્ગૌરબાધિકા ।
સારક્ષતાદપારાતેરસકૃદ્ગૌરવાધિકા ॥ ૧૬॥

અનુત્તમોહરાશયો ભવન્તિ યામનાશ્રિતાઃ ।
અનુત્તમો હરાશયો યયા ચિરં ચ રઞ્જિતઃ ॥ ૧૭॥

અનન્તરાગતાપાયાસ્તારયિત્રી ભવાપદઃ ।
અનન્તરાગતાપાયાઃ સા વો ગૌરી હિયાત્ક્રિયાઃ ॥ ૧૮॥

યામાયાસજિદાસક્તશોકજાલસ્ય પાતિની ।
યા માતા સર્વદા ભક્તલોકજાલસ્ય પાલની ॥ ૧૯॥

સામરાગમનાયાસં ત્યક્ત્વા સાર્ધં સુરારિભિઃ ।
સામરા ગમનાયાસન્નુદ્યતા યુધિ યદ્ગણાઃ ॥ ૨૦॥

સામોદયાજયા શાતૈઃ શસ્ત્રૈઃ શત્રૌ હતે યયા ।
સામોદયા જયાશા તૈર્ગીર્વાણૈર્ગર્વતો જહે ॥ ૨૧॥

યયાયાયાય્યયા યૂયં યો યોઽયં યેયયૈય યામ્ ।
યયુયાયિયયેયાય યયેઽયાયાય યાયયુક્ ॥ ૨૨॥

સાઽવ્યાદ્ગૌરી સદા યુષ્માન્સદાયુષ્માન્સમૃદ્ધ્યતિ ।
શરણં યાં નરો ગચ્છન્ન રોગચ્છન્દમેતિ ચ ॥ ૨૩॥

કૃતાસ્પદા યથા સમ્પદઘાનિ સુરવૈરિષુ ।
હન્તિ યા વાઙ્મયી દૂરાદઘાનિ સુરવૈરિષુઃ ॥ ૨૪॥

જિતાનયા યા નતાજિતારસાતતસારતા ।
ન સાવના નાવસાનયાતનારિરિના તયા ॥ ૨૫॥

મનોભવારાતિમનોભિરામયા જરામયાપાકરણૈકદક્ષયા ।
મદક્ષયાન્નિર્મલતાં દદાનયા સદા નયાસ્થા ક્રિયતાં તવાર્યયા ॥ ૨૬॥

સમાયયાવિન્દ્રહિતાય યા રણે સમાયયા યા ન જિતારિસેનયા ।
સ મા યયાચે હરમાશ્રિતઃ સ્ફુટં સમા યયા મુગ્ધતયા મનોજ્ઞતાઃ ॥ ૨૭॥

સા ભાવક્ષાલવર્યા નુતવિભવિતનુર્યા વલક્ષાવભાસા
જાનાનસ્યાશયપ્રા નવનલિનવનપ્રાયશસ્યાનનાજા ।
સાતં વર્માનનસ્થા રહસિ રસિહરસ્થાનનર્માવતંસા
પાયાદક્તા રણત્રા મતનમનતમત્રાણરક્તા દયાપા ॥ ૨૮॥

ઉપાસતે કૃષ્ટિકૃતોદયાં યાં જના સદારાધનમીહમાનાઃ ।
શમ્ભોઃ પ્રસિદ્ધા તનુતાં વહન્તી ગૌરી હિતં સા ભવતાં વિધેયાત્ ॥ ૨૯॥

યાં સદ્ય એવ ત્રિદશૈઃ પુમાંસઃ સમા નમસ્યન્તિ સદાનભોગાઃ ।
અઘાનિ યસ્ય પ્રણતા વિપક્ષૈઃ સમાનમસ્યન્તિ સદા નભોગાઃ ॥ ૩૦॥

યસ્યાઃ પ્રભાવો દ્યુસદાં વિપક્ષસેના વધાનન્દયિતાહરસ્ય ।
મનોમ્બુજસ્યાવહતુ શ્રિયૈ વઃ સેનાવધાનં દયિતા હરસ્ય ॥ ૩૧॥

સુરા જિતા ભાવિતદેવરાજદ્વિપક્ષમા યાત રણાદભીતમ્ ।
સ્વાપં ન વો ધામ હિતં ન નામ સદૈવસેના ભવતોહિતાનામ્ ॥ ૩૨॥

સુરાજિતા ભાવિતદેવરાજદ્વિપક્ષમાયા તરણાદભીતમ્ ।
સ્વાપન્નબોધામહિતં નનામ સદૈવ સેના ભવતો હિતાનામ્ ॥ ૩૩॥

સુરાનિતિ દ્વેષિજનૈરભિદ્રુતાનુદાહરદ્યા સ્વયમાહવોદ્યતા ।
શિવોઽદ્ય તાપપ્રશમસ્તયા તવ પ્રશસ્તયા તત્ત્વદૃશા વિધીયતામ્ ॥ ૩૪॥

વક્રં બિભ્રત્યુપહિતચન્દ્રાયાસં યા સંમોહપ્રશમનસૂર્યાકારા ।
કારાનીતામરમરિમાચિક્ષેપ ક્ષેપત્યક્તા રણભુવિ સા વઃ પાયાત્ ॥ ૩૫॥

હિતે હિતેઽસ્તુ તે સ્તુતે જિતાજિતામિતામિતા ।
જયાજયા જનોઽજનો યયા યયાવલં બલમ્ ॥ ૩૬॥

સક્તિં વઃ સુકૃતાર્જને વિદધતી સત્રાં યતાં ત્રાયતાં
દુર્ગા દુર્ગ્રહદૂષિતોદ્ધતધિયામાયાસદા યા સદા ।

સાધૂત્સાહવિધાનસક્તમનસાં મુખ્યા તતો ખ્યાતતાં
 સંસ્મૃત્યૈવ - - - મત્સરભરસ્ફીતાપદાં તાપદામ્ ॥ ૩૭॥

યા મૂર્તિં કિમપિ સ્મરારિવપુષા ધત્તે સમાયોજિતાં
 યાં દૃષ્ટ્વૈવ વિનાશમાપ સહસા શુમ્ભઃ સમાયોઽજિતામ્ ।
યા નમ્રૈઃ સુરસિદ્ધિકિંનરનરૈઃ ખેદં વિના શસ્યતે
 સા હેતુર્ભવતાં ત્રિલોચનવધૂરશ્રીવિનાશસ્ય તે ॥ ૩૮॥

સાયાસાયાસ્ત્રિલોક્યાઃ શરણમકરુણક્ષુણ્ણદૈત્યપ્રવીરા
 સ્વૈરં સ્વૈરંશસર્ગૈર્ગહનતમમહામોહહાર્દં હરન્તી ।
શસ્યાશસ્યાદધાના સકલમભિહિતં ભક્તિભાજઃ સ્મૃતૈવ
 સ્તાદસ્તાદભ્રદોષા દ્વિષદુપશમની સર્વતઃ પાર્વતી વઃ ॥ ૩૯॥

સુરસુરચિતચિતનવનવભવભવનાનાદરાદરાયેથે ।
લયલયચરણૌ ચરણૌ ન ન મામિ નતેન નમામિ ન તે ॥ ૪૦॥

યા વિસ્મયં સ્મરભિદા ચક્રેઽઙ્કારોપિતા નવં નારીણામ્ ।
વિદધે યચ્ચાપસ્ય ન ચ ક્રેઙ્કારોઽપિ તાનવં નારીણામ્ ॥ ૪૧॥

યા હન્તાં ચ પ્રયાતા વિહાયસા કંસમાહ તારાતિબલેન ।
કૃષ્ણસ્તવ પરમાયા વિહાય સાકં સમાહતારાતિબલેન ॥ ૪૨॥

તાં નમત યા ચ સમરેષ્વનેકશો ભાતિ ભદ્રકાલી નતયા ।
ખ્યાતિ યયા જનતોજ્જ્વલવિવેકશોભાતિભદ્રાકાલીનતયા ॥ ૪૩॥

તાં સ્મરત થા સ્મૃતૈવ હિ માનવતામરસમાનતા રાતિ બલાત્ ।
યત્પ્રણતં શ્રીઃ શ્રયતે માનવતામરસમાન તારાતિ બલાત્ ॥ ૪૪॥

અનવરાગસમુદ્ભવદેહતામુપગતા દદૃશે ગિરિશેન યા ।
અનવરાગસમુદ્ભવદેહ તામવનતોઽસ્મિ જગાત્પ્રિયતાં સતીમ્ ॥ ૪૫॥

મેને નૂનમનેન માનનમુમાનામ્ના નુ મેનોન્મના
 નુન્નેનોનમને નિમાનમમુના નો નામ નાનાનુમે ।
મૌનેનામમમાનનિમ્નમનનાન્નાનામિનાનૂનિમે
 સુન્મિન્નાનનમા નમી મુનિમનોમાનાનનોન્નામિનિ ॥ ૪૬॥

તાં વન્દેઽહં નવં દેહં જ્ઞાનરૂપં વિધાય યા ।
સુધીરસ્યતિ ધીરસ્ય મહામોહમયીં ત્વચમ્ ॥ ૪૭॥

યાં નુત્વા યાન્તિ હૃદ્યાર્થસજ્જાયાં ગિરિ શસ્યતામ્ ।
નૌમ્યહં ભક્તિમાસ્થાય સજ્જાયાં ગિરિશસ્ય તામ્ ॥ ૪૮॥

યદાનતોઽયદાનતો ન યાત્યયં નયાત્યયમ્ ।
શિવે હિતાં શિવેહિતાં સ્મરામિતાં સ્મરામિ તામ્ ॥ ૪૯॥

સરસ્વતિપ્રસાદં મે સ્થિતિ ચિત્તસરસ્વતિ ।
સરસ્વતિ કુરુ ક્ષેત્રકુરુક્ષેત્રસરસ્વતિ ॥ ૫૦॥

ત્વદ્ભક્તિભાવિતધિયો જગતામત્ર યે ત્રયે ।
જન્મવત્તામહં મન્યે તેષામેવાનૃણાં નૃણામ્ ॥ ૫૧॥

જગતઃ સાતિરેકા ત્વં ગતિરસ્ય સ્થિરાધિકા ।
તરસ્યત્રાસતારારેઃ સાસ્યત્રાસરસસ્થિતિ ॥ ૫૨॥

ત્વન્નામસ્મરણાદેવ ન લક્ષ્મીશ્ચપલાયતે ।
સર્વતઃ પાર્વતિ ક્ષિપ્રમલક્ષ્મીશ્ચ પલાયતે ॥ ૫૩॥

જયન્તિ ભક્તા વિત્તેશસમરાયસ્તબાહવે ।
તુભ્યન્નમસ્ત્રિલોક્યર્થસમરાયસ્તબાહવે ॥ ૫૪॥

સત્ત્વં સમ્યક્ત્વમુન્મીલ્ય હૃદિ ભાસિ વિરાજસે ।
દ્વિષામરીણા ત્વં સેનાં વાહિનીમુદકમ્પયઃ ॥ ૫૫॥

દૂરાગતરસા ધન્યઃ સેવતેયસ્તવ સ્તુતીઃ ।
દૂરાગત રસાધન્યઃ કલ્પન્તે તસ્ય સિદ્ધયઃ ॥ ૫૬॥

મોહં હત્વાસ્પદં યાસિ સાત્ત્વમમ્બરવાસિના ।
યા ન સંસ્તૂયસે કેન સા ત્વમ્બરવસિના ॥ ૫૭॥

પ્રકાશ્ય ગૃહ્યપુંસસ્યખેદચ્છેદામ્બુદાવલી ।
પ્રજ્ઞાત્મનેનવિમલા સ્મિતા દૃશ્યસિ વિદ્વતામ્ ॥ ૫૮॥

ભવાનિ યે નિરન્તરં તવ પ્રણામલાલસાઃ ।
મનસ્તમોમલાલસા ભવન્તિ નૈચ તુ ક્વચિત્ ॥ ૫૯॥

વિભાવનાકુલા ત્વયિ ક્રમેણ દેવિ ભાવના ।
વપુષ્પતિસ્થિરેતરે નિતાન્તમેવ પુષ્યતિ ॥ ૬૦॥

મહોઽદયાનામવધી રણેન મહોદયાનામવધીરણેન ।
મહોદયાનામવ ધીરણેજમહોદયાનામવધીરણેન ॥ ૬૧॥

ન મજ્જનેન તીર્થાનાં તદિહ પ્રાપ્યતે શુભમ્ ।
નમજ્જનેન તીર્થાનાં સેવયા યત્તવામ્બિકે ॥ ૬૨॥

પ્રયાતિ મોહે નિઃસારભારતીવ્રતમેત્યયમ્ ।
ત્વાત્પ્રાસાદાજ્જનઃ સારભારતીવ્રતમેત્યયમ્ ॥ ૬૩॥

શાસ્ત્રપ્રભાવહસિતાઃ સતાં યા નિર્મલા ગિરઃ ।
શાસ્ત્રપ્રભાવહસિતાસ્ત્વમમ્બતિમિરચ્છિદઃ ॥ ૬૪॥

શમીહ તે સમાનતો વિભાવિતોઽત્રસન્ન યઃ ।
વિભાવિતોઽત્ર સન્નયઃ શમીહતે સ માનતઃ ॥ ૬૫॥

માતરં ત્વા પદં સદ્ય આશ્રિતાસ્તે કથં જનાઃ ।
મા તરન્ત્વાપદં સદ્ય આદ્યં શ્રેયઃ સમાશ્રિતાઃ ॥ ૬૬॥

ભાતિ ત્વત્તનુસંશ્લેષે સત્યમ્બ વપુરનુત્તરમ્ ।
સંસારાબ્ધૌ સદાહુસ્તે સત્યં વપુરનુત્તરમ્ ॥ ૬૭॥

યચ્છ મે નિત્યસંસઙ્ગિ યચ્છમે તદિદં મનઃ ।
સ્વચ્છલો ભક્તિયોગસ્તે સ્વચ્છલોકવિવેકસૂઃ ॥ ૬૮॥

કે વલન્તે વિતન્વન્તકૃતસ્ત્વત્પ્રણતા ભવે ।
કેવલં તે વિતન્વન્ત આસતે વિમલાં ધિયમ્ ॥ ૬૯॥

દેવિ નિર્દગ્ધકામસ્ય ત્વં નિરાવરણાત્મનઃ ।
હરસ્ય શુભસન્તાનં તેનાસૌ ભ્રાજતે તથા ॥ ૭૦॥

દ્વિષદ્ભિયા સપદિ વિમુચ્યતે યતસ્તવાનતો જનનિ જયાશયા ન કઃ ।
સ્તવાનતો જનનિજયા શયાનકઃ કરોતિ તે યુધિ મધુસૂદનસ્વસઃ ॥ ૭૧॥

જ્યાયોનિષ્ઠારિવિર્યાધિનિયમનવરસ્વૈરદત્તાયતાજ્ઞા
 સ્વારાધત્વાસમધ્યાનિયજનજનનિ જ્ઞેયસુસ્થાવભાસા ।
નાનાપુણ્યાગમસ્થા જનનમનમયજ્ઞાનનન્ધા વરા ધી-
 ર્યાતા નવ્યા વિભુત્વં નુતસરલમનસ્તામસસ્યાવહાસ્યે ॥ ૭૨॥

સ્યેહાવ સ્યા સમસ્તાનમલરસતનુ ત્વં ભુવિ વ્યાનતાર્યા
 ધીરા વન્ધા ન ન જ્ઞા યમનમનનજસ્થામગણ્યા પુનાના ।
સા ભાવસ્થા સુયજ્ઞેઽનિનજનજયનિ ધ્યામસત્ત્વાધરાસ્વા

જ્ઞાતાયત્તાદરસ્વૈરવનમનિધિર્યા વરિષ્ઠાનિયોજ્યા ॥ ૭૩॥

અલોલકમલે ચિત્તલલામકમલાલયે ।
પાહિ ચણ્ડિ મહામોહભઙ્ગભીમબલામલે ॥ ૭૪॥

દુર્ગાપિ માતઃ સુલભાસિ ભક્ત્યા ભવાનુકૂલાપિ ભવં ક્ષિણોષિ ।
અધ્યેયતાં યાસિ સદૈવ દેવિ ધ્યેયાસિ ચિત્રં ચરિતં તવૈતત્ ॥ ૭૫॥

મહદેસુરસન્ધમ્મે તમવસમાસઙ્ગમાગમાહરણે ।
હરબહુસરણં તં ચિત્તમોહમવસર ઉમે સહસા ॥ ૭૬॥

વન્ધ્યા પ્રભાતસન્ધ્યેવ સૂર્યાલોકપ્રવર્તિની ।
નિવર્તયસિ દેવિ ત્વં મહામોહમયીં નિશામ્ ॥ ૭૭॥

સંવાદિસારસમ્પત્તીસદાગોરિજયેસુદે ।
તવસત્તીરદે સન્તુ સંસારે સુસમાનદે ॥ ૭૮॥

આગમમણિસુદમહિમસમસંમદકૃદપરજસ્સુ ।
કિર સવિભયવદિતો સમય ઉજ્જલભાવસહસ્સુ ॥ ૭૯॥

ત્વં વાદે શાસ્ત્રસઙ્ગિન્યાં ભાસિ વાચિ દિવૌકસઃ ।
તવાદેશાસ્ત્રસંસ્કારાજ્જયન્તિ વરદે દ્વિષઃ ॥ ૮૦॥

સદાવ્યાજવશિધ્યાતાઃ સદાત્તજપશિક્ષિતાઃ ।
દદાસ્યજસ્રં શિવતાઃ સૂદાત્તાજદિશિ સ્થિતાઃ ॥ ૮૧॥

હરેઃ સ્વસારં દેવિ ત્વા જનતાશ્રિત્ય તત્ત્વતઃ ।
વેત્તિ સ્વસારં દેવિત્વા યોગેન ક્ષપિતાશુભા ॥ ૮૨॥

સદાપ્નોતિ યતિર્જ્યોતિસ્તાદૃશં સ્વત્પ્રભાવતઃ ।
પ્રભાવતઃ સમો યેન કલ્પતે મોહનુત્તિતઃ ॥ ૮૩॥

ત્વં સદ્ગતિઃ સિતાપારા પરા વિદ્યોત્તિતીર્ષતઃ ।
સંસારાદત્ર ચામ્બ ત્વં સત્ત્વં પાસિ વિપત્તિતઃ ॥ ૮૪॥

પરમા યા તપોવૃત્તિરાર્યાયાસ્તં સ્મૃતિં જનાઃ ।
પરમાયાત પોષાય ધિયાં શરણમાદૃતાઃ ॥ ૮૫॥

પ્રવાદિમતભેદેષુ દૃશ્યસ્તે મહિમાશ્રયઃ ।
ભાન્તિ ત્વત્ત્રિશિખસ્યેવ શિખાનામસમાશ્રયઃ ॥ ૮૬॥

યચ્ચેષ્ટયા તવ સ્ફીતમુદારવસુ ધામતઃ ।
યચ્ચેતો યાત્યવહિતમુદા રવસુધામતઃ ॥ ૮૭॥

સુરદેશસ્ય તે કીર્તિં મણ્ડનત્વં નયન્તિ યૈઃ ।
વરદે શસ્યતે ધીરૈર્ભવતી ભુવિ દેવતા ॥ ૮૮॥

તત્ત્વં વીતાવતતતુત્તત્વં તતવતી તતઃ ।
વિત્તં વિત્તવ વિત્તત્વં વીતાવીતવતાં બત ॥ ૮૯॥

તારે શરણમુદ્યન્તી સુરેશરણમુદ્યમૈઃ ।
ત્વં દોષાપાસિનોદગ્રસ્વદોષા પાસિ નોદને ॥ ૯૦॥

સુમાતરક્ષયાલોક રક્ષયાત્તમહામનાઃ ।
ત્વં ધૈર્યજનની પાસિ જનનીતિગુણસ્થિતીઃ ॥ ૯૧॥

ખ્યાતિકલ્પનદક્ષૈકા ત્વં સામર્ગ્ર્યજુષામિતઃ ।
સદા સરક્ષસાંમુખ્યદાનવાનામસુસ્થિતિઃ ॥ ૯૨॥

સિતા સંસત્સુ સત્તાસ્તે સ્તુતેસ્તે સતતં સતઃ ।
તતાસ્તિતૈત્તિ તસ્તેતિ સૂતિઃ સૂતિસ્તતોઽસિ સા ॥ ૯૩॥

ત્વદાજ્ઞયા જગત્સર્વં ભાસિતં મલનુદ્યતઃ ।
સદા ત્વયા સગન્ધર્વં સમિદ્ધમરિનુત્તિતઃ ॥ ૯૪॥

યતો યાતિ તતોઽત્યેતિ યયા તાં તાયતાં યતૈઃ ।
માતામિતોત્તમતમા તમોતીતાં મતિં મમ ॥ ૯૫॥

મહત્તાં ત્વં શ્રિતા દાસજનં મોહચ્છિદા વસ ।
યચ્છદ્દ્ત્વં ગતઃ પાપમન્યસ્ય પ્રસભં જય ॥ ૯૬॥

ત્વાં સાજ્ઞાસુ જગન્માતઃ સ્પષ્ટં જ્ઞાતા સુવર્ત્મસુ ।
પ્રજ્ઞા મુખ્યા સમુદ્ભાસિ તત્પૃથુત્વં પ્રદર્શય ॥ ૯૭॥

આજ્ઞાસુ જગન્માતઃ સ્પષ્ટં જ્ઞાતા સુવર્ત્મસુ પ્રજ્ઞા ।
ભાસિ ત્વં સા મુખ્યા સમુત્પૃથુત્વં પ્રદર્શય તત્ ॥ ૯૮॥

હન્ત્ર્યો રુષઃ ક્ષમા એતા સન્દક્ષોભાસ્તમુન્નતઃ ।
સતેહિતઃ સેવતે તાઃ સતતં યઃ સ તે હિતઃ ॥ ૯૯॥

કરોષિ તાત્સ્ત્વમુત્ખાતમોહસ્થાને સ્થિરા મતીઃ ।
પદં યતિઃ સુતપસા લભતેઽતઃ સશુક્લિમ ॥ ૧૦૦॥

દેવ્યા સ્વપ્નોદ્ગમાદિષ્ટદેવીશતકસંજ્ઞયા ।
દેશિતાનુપમામાધાદતો નોણસુતો નુતિમ્ ॥ ૧૦૧॥

હાર્દધ્વાન્તનિયન્તૃભાસ્વરવપુઃ સ્વર્વાસિનાં સર્વતો
દુર્વારારિપરિક્ષયં વિદધતી ધ્યાતૈવ લર્વાણસૂઃ ।
દેહાર્ધે નિહિતા ભવેન ભુવનત્રાણૈકતાનાત્મના
દેવિ ત્વં ત્વમિવાપરા જગતિ કા સત્કેસરીન્દ્રસ્થિતિઃ ॥ ૧૦૨॥

ક્લેશોન્માથકરી સતાં ભવહરાનન્દૈકહેતો ગુરુ-
ર્માતા ત્વં જગતાં ભવન્તિ વિધવાઃ સર્વે તવાનુગ્રહાત્ ।
દુર્ગે ન ક્વચિદેવ સીદતિ જનસ્ત્વદ્ભક્તિપૂતાશયઃ
સ્તુત્યા ભર્તુરભિન્નયેતિ વિબુધૈસ્ત્વં સ્તૂયસે શ્રીરિવ ॥ ૧૦૩॥

યેનાનન્દકથાયાં ત્રિદશાનન્દે ચ લાલિતા વાણી ।
તેન સુદુષ્કરમેતત્સ્તોત્રં દેવ્યાઃ કૃતં ભક્ત્યા ॥ ૧૦૪॥

ઇતિ શ્રીમદાનન્દવર્ધનાચાર્યવિરચિતં દેવીશતકં સમ્પૂર્ણમ્ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*devIshatakam*

pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*